**International Journal of Research in Social Sciences**
Vol. 9 Issue 4, April 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# साक्षीस्वरुपविचारः

***डॉ. भगवानसामन्तरायः***

***विभागाध्यक्षः, अद्वैतवेदान्तविभागः***
***केन्द्रीय संस्कृत विश्वविद्यालयः***
***वेदव्यासपरिसरः,वलाहर,हिमाचलप्रदेशः***

सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् इति श्रुतिप्रतिपादितम् एकं शुद्धं नित्यमेव ब्रह्म "एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं वरुणमातरिश्वानमाहुः" इति अनेकशक्तियुक्तं विविधनाम्ना लोके अनेकधा च व्यपदिश्यते । तत् सृष्ट्वा तदेवानुप्राविशत् इति श्रुत्यापि परिदृश्यमानस्यास्य प्रत्येकस्यापि पदार्थस्य सदधिष्ठानत्वेन ब्रह्म विवर्त्तितम् । अतः उक्तं सर्वं खल्विदं ब्रह्म । अत्रेयं शङ्का यद् सर्वं ब्रह्ममयं खलु इदं जगत् । तर्हि विविधनाम्ना रुपेण च कथमिदं जगत् व्यवह्रियते । लोकव्यवहाराय अर्थक्रियाकारित्वसम्पादनाय च व्यावहारिकं जगत् प्रवर्त्तते । अज्ञानोपहितस्य जगतः तत्र विद्यमानानां अज्ञानिप्राणिजातानां तस्मान्मुक्तये आत्मैक्यबुद्धिप्रतित्तये अध्यारोपापवादन्यायेन भिन्नेष्वभिन्नत्वम् प्रतिपाद्यते । तत्र पञ्चदशीकारः एवं ब्रवीति यथा- एक एव आकाशः तत्तदुपाधियोगात् महाकाश-घटाकाश- जलाकाश-मेघाकाश इति उच्यते तथैव एकमेव ब्रह्म तत्तदुपाधिभेदेन परमात्मा- कुटस्थ-ईश्वरः-जीव इति व्यवह्रियते ।तत्र कुटस्थ इति पदेन यत् उच्यते स एवात्र साक्षीति ज्ञायते । को नाम साक्षी इति जिज्ञासायाम् उच्यते स्थूलसूक्ष्मभूतयोः देहयोः साक्षात् द्रष्टा निर्विकारत्वात् साक्षीत्युच्यते । लोके हि औदासीन्य-बोधाभ्याम् एव साक्षीत्वं सिद्धम् । साक्षी=द्रष्टा-दर्शनकर्ता इत्यर्थः।

सविता प्रकाशते इति सूर्ये प्रकाशकर्त्तृत्वम् आरोप्यते तथैव दृशिस्वरूपे साक्षिणि द्रष्टृत्वं दर्शनकर्त्तृत्वम् वा ननु साक्षिणः कर्त्तृत्वात् कर्त्तृत्वसत्वे च विकारसत्वस्य अवश्यम्भावित्वात् कथं साक्षी निर्विकारः भवेत् इति चेत् , उच्यते- साक्षिणि कर्त्तृत्वम् आरोपितम् न तु वास्तवम् । यथा अकर्त्तरि प्रकाशात्मके सवितरि आरोप्यते ।वस्तुतस्तु साक्षी अकर्त्ता अभोक्ता उदासीनश्च । स एव साक्षी कूटस्थ इत्युच्यते । कुटे= मिथ्याबुद्धौ चिदाभासे वा निर्विकाररूपेण असङ्गरूपेण वा यच्चैतन्यम् अवतिष्ठते तस्यैव चैतन्यस्य साक्षित्वमुच्यते । स च साक्षी स्वप्रकाशरूपः स्थूलसूक्ष्मात्मकं शरीरद्वयम् अवभासयति । तदुक्तं कुटस्थदीपे – देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षी इति उच्यते ।

जीवचैतन्यस्य एव साक्षित्वमस्तु किं पृथक् साक्षित्वेन इति चेत् न, तथा नैव स्वीकर्त्तुं शक्यते । यतोहि लौकिकवैदिकव्यतवहारकर्त्तुः तस्य जीवस्य औदासीन्यद्रष्टृत्वासम्भवः प्रतीयते । किम् च श्रुतिप्रमाणितम् यत् साक्षीत्वं – "साक्षी चेता केवलो निर्गुणश्च" इति जीवे सर्वथा अयुक्तं भवति । अयं च

**International Journal of Research in Social Sciences**
Vol. 9 Issue 4, April 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

साक्षी सर्वदा अनावृत्तस्सन् तिष्ठतीति स्वीक्रियते । अनावृत स्वरूपेण साक्षिणा सह सम्बन्धात् एव अज्ञानान्तःकरणं तद् धर्माणां प्रकाशः भवति, तेन च तत् सत्ताविषयकम् अज्ञानं संशयादिकं च न वर्त्तते ।

ननु साक्षीस्वीकारे किं प्रयोजनम् इति चेत् उच्यते स्थूलसूक्ष्मात्मकस्य जीवशरीरद्वयस्य अवभासार्थं साक्षी स्वीक्रियते । एतयोः जीवशरीरद्वययोः जडत्वेन अप्रकाशरूपत्वात् तयोः अवभासार्थं साक्षिरूपं स्वप्रकाशात्मकं चैतन्यमङ्गीक्रियते । पुनः शङ्का यत्, शरीरद्वयस्य प्रकाशार्थम् अन्तःकरणवृत्तिः एव पर्याप्ता भवतु इति चेत् न, अन्तःकरणस्य जडत्वात् अन्तःकरणवृत्याख्यम् अन्तःकरणपरिणाममपि जडमेव । अन्तःकरणवृतेः प्रकाशार्थमपि चैतन्यस्यापेक्षा वर्तते । तदेव अवभासकम् चैतन्यमत्र साक्षीति अभिधीयते । तस्मात् जीवस्य स्थूलसूक्ष्मदेहयोः अवभासार्थं साक्षी स्वीकरणीय एव । किम् च साक्षिणं विना जडान्तःकरणवृत्तिः सुखदुःखादिकमपि अवभासयितुं न भवति । यतोहि अन्तःकरणम्, अन्तःकरणवृत्तिः,अन्तःकरणधर्मभूताः सुखदुःखादयः साक्षिणः एव विषयाः भवन्ति, न तु अन्येषां केषांचित् इन्द्रियाणां वा । अन्तःकरणवृत्तेः साक्षिविषयत्वाच्च साक्षिचैतन्यावलोकेन आलोकिता सत्येव सा प्रकाशते । जीवानाम् अहं त्वाभिमानस्य सदातन प्रकाशश्च साक्षिस्वीकारेणैव उपपद्यते । अहंत्वस्य च जडत्वात् साक्षिचैतन्याभ्युपगमं विना तस्य प्रकाशमानत्वं नोपपद्यते । अतः अहंत्वप्रकाशस्य उपपादनार्थं साक्षी स्वीकरणीयः ।

किं च ज्ञानेच्छादिविषयग्रहणान्यथानुपपत्या साक्षी कल्प्यते इति अर्थापत्तिप्रमाणमपि स्वीक्रियते । वेदान्तपरिभाषायां प्रत्यक्षप्रमाणप्रकरणे धर्मराजाध्वरीन्द्रेण ज्ञानगत विषयगतप्रत्यक्षद्वयं प्रतिपाद्य प्रत्यक्षप्रमा तु अत्र चैतन्यमेवेति उपसंहृतम् । अर्थात् स्वप्रकाशचैतन्यं विना न किमपि बाह्यमान्तरं वा ज्ञानं सम्पद्यते वेदान्तशास्त्रे । नापि मानसप्रत्यक्षमस्माभिरभ्युपगम्यते, प्रकाशत्वायोगात् । प्रकाशमानस्यैव प्रकाशकत्वात् तथा चोक्तं तत्त्वशुद्धौ-"प्रतिभासमानस्यैव ज्ञानस्य तत् साधकत्वं वक्तव्यम्" इति । एवञ्च इन्द्रियान्तःकरणादीनां सर्वेषां साक्षीचैतन्यप्रकाशकत्वात् साक्षी स्वीकरणीय एव । नापि जीवः ज्ञानेच्छादीनां ग्राहको भवति । यतो हि सः अज्ञानान्तःकरणावच्छिन्नः सन् आवृत्तस्तिष्ठति । सहकारिप्रमाणं विना तस्य आवरणनिवृत्तिः न भवति । तस्मात् ज्ञानेच्छादीनां प्रमाणग्राह्यत्वासम्भवात् तद् ग्राहकः कश्चित् कल्पनीयः । यश्च तद् ग्राहकः, स एव साक्षी । अन्यथा ज्ञानादिव्यवहारविलोपः प्रसज्येत । तथा चोक्तं तत्त्वशुद्धौ- "सर्वैरपि साक्षिस्वरूपम् अभ्युपगन्तव्यम् अन्यथा व्यवहारानुपपत्तेः" इति ।

जीवे इश्वरे च चैतन्यं साक्षिरूपेण अनुभूयमानत्वात् कुतः जीवेश्वरयोःत् भिन्नः साक्षीति पृथक् रूपेण स्वीक्रियते इति जिज्ञासायामुच्यते । साक्षिणः औदासीन्यात् न स जीवः, नापि ईश्वरः । कर्त्ता,भोक्ता,संसारी च जीवः,यथा न उदासीनः । सृष्टिस्थिति लयकर्त्ता ईश्वरः अपि न उदासीनः इति जीवस्य ईश्वरस्य वा न साक्षित्वम् । कदाचिन्मनसि संन्देहो जायते जीवस्य औदासीन्यं न स्यात् परन्तु ईश्वरस्य तु औदासीन्ये साक्षित्वं भवितुमर्हति । तत्रोच्यते भगवद्गीतायां-

**International Journal of Research in Social Sciences**
Vol. 9 Issue 4, April 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

"*ईश्वरः सर्वभूतानां हृद्देशे र्जुन तिष्ठति ।*
*भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।*" इति

मायाया सर्वभूतानि पदेन मायावच्छिन्नचैतन्यमीश्वरः जगत्सृष्टि नियमनादिव्यापारकर्त्ता कथमुदासीनः स्यात् ।जीवस्य साक्षित्वाभावः प़ञ्चदश्याम् अपि दर्शितः – "यः साक्षी जीवात् भेदेन दर्शित" इति । जीवकोटौ ईश्वरकोटौ च साक्षिणः प्रवेशो नास्तीति अद्वैतसिद्धिकारैरपि दर्शितम् । "जीवात् विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि किन्तु अस्पृष्टजीवेश्वरविभागं चैतन्यम्" । इति । एव़ञ्च ईश्वरत्व जीवत्वादिधर्मरहितं जीवाधिष्ठानं शुद्ध-ब्रह्मचैतन्यं जीवेन अभिन्नं सत् साक्षिपदवीं लभते ।

केचन ईश्वरस्य साक्षित्वमनुमिमानाः वदन्ति यत्, परमेश्वरस्य रुपभेदः केवलं जीवप्रवृत्तिनिमित्तकः एव,वस्तुतः सः ईश्वर उदासीनः । तदुक्तं ईश्वरस्य रुपभेदोऽसौ कारणत्वादिवर्जितः इति ,अयं च ईश्वरसाक्षी सर्वभूतान्तरात्मा सर्वभूताधिवासः सर्वान्तर्यामी सर्वकार्याध्यक्ष्यः अपि उदासीन । उक्तं च "एको देवः सर्वभूतेषु गुढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" इति श्रुतेः । एवमेव जीवस्यापि साक्षित्वमनुमिमानाः एवं वदन्ति यत् , यथा रज्ज्व सर्पस्यारोपः मिथ्याभूतः । जीवः स्वरूपतः असंगः उदासीनश्चेति तस्य साक्षित्वं सम्भवति । जीवस्य कर्त्तृत्वभोक्तृत्वादिकं च अन्तःकरण जीवचैतन्ययोः तादात्म्याध्यासेन जीवे आरोप्यते । आरोप्यस्य मिथ्यात्वेन जीवस्य कर्त्तृत्वभोक्तृत्वादिकमपि मिथ्या । तस्य असङ्गोदासीनं रूपम् एव सत्यम् । तदुक्तं सिद्धान्तलेशसंग्रहे- अविद्योपाधिको जीव एव साक्षात् द्रष्टृत्वात् साक्षी । लोकेपि ह्यकर्त्तृत्वे सति द्रष्टृत्वं साक्षित्वम् इति प्रसिद्धम् । तच्चासंग उदासीनप्रकाशे जीवे एव साक्षात् सम्भवति । एवञ्चान्ततोगत्वा साक्षिद्वैविध्यं स्वीकृतम् । जीवसाक्षी ईश्वरसाक्षी चेति । जीवसाक्षी तु अन्तःकरणोपहितचैतन्यम् । यच्चैतन्यं अन्यस्माच्चैतन्यात् अन्तःकरणैः आवृत्तमपि अन्तःकरणानुप्रविष्टं तच्चैतन्यं जीवसाक्षी इत्यभिधीयते । प्रतीयमानकर्त्तृत्वादिनिर्वाहाय यथा अन्तःकरणावच्छिन्नचैतन्यरूपः जीवः पृथक् अङ्गीक्रियते । तथा ज्ञानसुखादिविषयप्रकाशनिर्वाहाय जीवसाक्षी अपि । एवमेव मायावच्छिन्नं चैतन्यम् ईश्वरः । अनादिश्च । मायायाः विशेषणत्वे ईश्वरत्वम्, उपाधित्वे साक्षित्वमिति ईश्वरत्व-साक्षित्वयोर्भेदः । एवं प्रकारेण अद्वैतवेदान्तदिशा साक्षिस्वरूपविचारः प्रतिपादित ।

**International Journal of Research in Social Sciences**
Vol. 9 Issue 4, April 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

***अनुशीलितसन्दर्भग्रन्थाः*** –

1. *ईशादिदशोपनिषदः (शाङ्करभाष्योपेताः )*
2. *श्वेताश्वतरोपनिषद् (शाङ्करभाष्योपेता)*
3. *ब्रह्मसूत्रम्,शाङ्करभाष्यम् ( रत्नप्रभा-भामती-न्यायनिर्णय-कल्पतरु-परिमलटीकोपेतम्)*
4. *श्रीमद्भगवद्गीता (शाङ्करभाष्यसहिता)*
5. *वेदान्तपरिभाषा*
6. *वेदान्तसारः*
7. *पञ्चदशी*
8. *विवेकचूडामणिः*
9. *अद्वैतसिद्धिः*
10. *तत्त्वप्रदीपिका*
11. *तत्त्वशुद्धिः*
12. *सिद्धान्तलेशसंग्रहः*